

॥ श्रीगुरुभ्यो नमः ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता — क्रम पाठः

## सप्तमकाण्डे पञ्चमः प्रश्नः

### सत्रविशेषाभिधानं

ॐ नमः परमात्मने । श्री गुरुभ्यो नमः । हरिः ॐ

गावो॒ वै। वा ए॒तत्। ए॒तथ् स॒त्रम्। स॒त्रमा॑सत। आ॒स॒ता॒शृ॒ङ्गाः। अ॒शृ॒ङ्गाः स॒तीः। स॒तीः
शृङ्गा॑णि। शृङ्गा॑णि नः। नो॒ जा॒य॒न्तै॒। जा॒य॒न्ता॒ इति॑। इति॒ कामे॑न। कामे॒न तासा᳚म्। तासा॒म्
दश॑। द॒श मासा᳚ः। मासा॒ निष॑ण्णाः। निष॑ण्णा॒ आस॑न्न्। निष॑ण्णा॒ इति॒ नि—स॒न्ना॒ः। आस॒न्नथ॑।
अथ॒ शृङ्गा॑णि। शृङ्गा᳚ण्यजायन्त। अ॒जा॒य॒न्त॒ ताः। ता उत्। उद॑तिष्ठन्न्। अ॒ति॒ष्ठ॒न्नरा᳚थ्स्म।
अरा॒थ्स्मेति॑। इत्यथ॑। अथ॒ यासा᳚म्। यासा॒म् न। नाजा॑यन्त। अजा॑यन्त॒ ताः। ताः सँ॑व्व-
थ्स॒रम्। सँ॒व्व॒थ्स॒रमा॒प्त्वा। सँ॒व्व॒थ्स॒रमिति॑ सम्—व॒थ्स॒रम्। आ॒प्त्वोत्। उद॑तिष्ठन्न्। अ॒ति॒ष्ठ॒न्न-
रा᳚थ्स्म। अरा॒थ्स्मेति॑। इति॒ यासा᳚म्। यासा᳚म् च। चाजा॑यन्त। अजा॑यन्त॒ यासा᳚म्। यासा᳚म्
च। च॒ न। न ताः। ता उ॒भयी᳚ः। उ॒भयी॒रुत्। उद॑तिष्ठन्न्। अ॒ति॒ष्ठ॒न्नरा᳚थ्स्म। अरा॒थ्स्मेति॑।
इति॑ गोस॒त्रम्। गो॒स॒त्रव्ँवै। गो॒स॒त्रमिति॑ गो—स॒त्रम्। वै सँ॑व्वथ्स॒रः। ॥ [१] ॥ सँ॒व्व॒थ्स॒रो
ये। सँ॒व्व॒थ्स॒र इति॑ सम्—व॒थ्स॒रः। य ए॒वम्। ए॒वव्ँवि॒द्वाꣳसः॑। वि॒द्वाꣳसः॑ सँव्वथ्स॒रम्। सँ॒व्व॒-
थ्स॒रमु॑प॒यन्ति॑। सँ॒व्व॒थ्स॒रमिति॑ सम्—व॒थ्स॒रम्। उ॒प॒यन्त्यृ॑द्ध्नुवन्ति॑। उ॒प॒यन्तीत्यु॑प—यन्ति॑।
ऋ॒द्ध्नु॒वन्त्ये॒व। ए॒व तस्मा᳚त्। तस्मा᳚त् तू॒परा। तू॒परा वा॒र्षि॑कौ। वा॒र्षि॑कौ॒ मासौ᳚। मासौ॒ पत्वा᳚।
पत्वा॑ चरति। च॒र॒ति॒ स॒त्राभि॑जितम्। स॒त्राभि॑जित॒ꣳ॒ हि। स॒त्राभि॑जित॒मिति॑ स॒त्र—अ॒भि॒जि॒त॒म्।
ह्य॑स्यै। अ॒स्यै॒ तस्मा᳚त्। तस्मा᳚थ् सँव्वथ्सर॒सदः॑। सँ॒व्व॒थ्स॒र॒स॒दो॒ यत्। सँ॒व्व॒थ्स॒र॒स॒द॒ इति॑ सँव्व-
थ्सर—सदः॑। यत् किम्। किम् च॑। च॒ गृ॒हे। गृ॒हे क्रि॒यते᳚। ? क्रि॒यते॒ तत्। तदा॒प्तम्। आ॒प्त-

मवरुद्धम्। अवरुद्धमभिजितम्। अवरुद्धमित्यव—रुद्धम्। अभिजितम् क्रियते। अभिजित-मित्यभि—जितम्। क्रियते समुद्रम्। समुद्रवैँ। वा एते। एते प्र। प्र प्लवन्ते। प्लवन्ते ये। ये संवँत्सरम्। संवँत्सरमुपयन्ति। संवँत्सरमिति सम्—वत्सरम्। उपयन्ति यः। उपयन्ती-त्युप—यन्ति। यो वै। वै समुद्रस्य। समुद्रस्य पारम्। पारम् न। न पश्यति। पश्यति न। न वै। वै सः। स ततः। तत उत्। उदेति। एति संवँत्सरः। संवँत्सरो वै। संवँत्सर इति सम्—वत्सरः। ॥ [२] ॥ वै समुद्रः। समुद्रस्तस्य। तस्यैतत्। एतत् पारम्। पारय्यँत्। यदतिरात्रौ। अतिरात्रौ ये। अतिरात्रावित्यति—रात्रौ। य एवम्। एवव्विँद्वाꣳसः। विद्वाꣳसः संवँत्सरम्। संवँत्सरमुपयन्ति। संवँत्सरमिति सम्—वत्सरम्। उपयन्त्यनार्ताः। उपयन्तीत्युप—यन्ति। अनार्ता एव। एवोदृचम्। उदृचम् गच्छन्ति। उदृचमित्युत्—ऋचम्। गच्छन्तीयम्। इयवैँ। वै पूर्वः। पूर्वोऽतिरात्रः। अतिरात्रोऽसौ। अतिरात्र इत्यति—रात्रः। असावुत्तरः। उत्तरो मनः। उत्तर इत्युत्—तरः। मनः पूर्वः। पूर्वो वाक्। वागुत्तरः। उत्तरः प्राणः। उत्तर इत्युत्—तरः। प्राणः पूर्वः। प्राण इति प्र—अनः। पूर्वोऽपानः। अपान उत्तरः। अपान इत्यप—अनः। उत्तरः प्ररोधनम्। उत्तर इत्युत्—तरः। प्ररोधनम् पूर्वः। प्ररोधनमिति प्र—रोधनम्। पूर्व उदयनम्। उदयनमुत्तरः। उदयनमित्युत्—अयनम्। उत्तरो ज्योतिष्टोमः। उत्तर इत्युत्—तरः। ज्योति-ष्टोमो वैश्वानरः। ज्योतिष्टोम इति ज्योतिः—स्तोमः। वैश्वानरोऽतिरात्रः। अतिरात्रो भवति। अतिरात्र इत्यति—रात्रः। भवति ज्योतिः। ज्योतिरेव। एव पुरस्तात्। पुरस्ताद् दधते। दधते सुवर्गस्य। सुवर्गस्य लोकस्य। सुवर्गस्येति सुवः—गस्य। लोकस्यानुख्यात्यै। अनुख्यात्यै चतुर्विꣳशः। अनुख्यात्या इत्यनु—ख्यात्यै। चतुर्विꣳशः प्रायणीयः। चतुर्विꣳश इति चतुः—विꣳशः। प्रायणीयो भवति। प्रायणीय इति प्र—अयनीयः। भवति चतुर्विꣳशतिः। चतुर्विꣳ-शतिरर्द्धमासाः। चतुर्विꣳशतिरिति चतुः—विꣳशतिः। अर्द्धमासाः संवँत्सरः। अर्द्धमासा इत्यर्द्ध—मासाः। ॥ [३] ॥ संवँत्सरः प्रयन्तः। संवँत्सर इति सम्—वत्सरः। प्रयन्त एव। प्रयन्त इति प्र—यन्तः। एव संवँत्सरे। संवँत्सरे प्रति। संवँत्सर इति सम्—वत्सरे। प्रति तिष्ठन्ति। तिष्ठन्ति तस्य। तस्य त्रीणि। त्रीणि च। च शतानि। शतानि षष्टिः। षष्टिश्च। च स्तोत्रीयाः। स्तोत्रीयास्तावतीः। तावतीः संवँत्सरस्य। संवँत्सरस्य रात्रयः। संवँत्सर-

स्येति सम्—वथ्सरस्य। रात्रय उभे। उभे एव। उभे इत्युभे। एव संवँथ्सरस्य। संवँथ्सरस्य रूपे। संवँथ्सरस्येति सम्—वथ्सरस्य। रूपे आप्नुवन्ति। रूपे इति रूपे। आप्नुवन्ति ते। ते सङ्स्थित्यै। सङ्स्थित्या अरिष्ट्यै। सङ्स्थित्या इति सम्—स्थित्यै। अरिष्ट्या उत्तरैः। उत्तरैरहोभिः। उत्तरैरित्युत्—तरैः। अहोभिश्चरन्ति। अहोभिरित्यहः—भिः। चरन्ति षडहाः। षडहा भवन्ति। षडहा इति षट्—अहाः। भवन्ति षट्। षड् वै। वा ऋतवः। ऋतवः संवँथ्सरः। संवँथ्सर ऋतुषु। संवँथ्सर इति सम्—वथ्सरः। ऋतुष्वेव। एव संवँथ्सरे। संवँथ्सरे प्रति। संवँथ्सर इति सम्—वथ्सरे। प्रति तिष्ठन्ति। तिष्ठन्ति गौः। गौश्च। चायुः। आयुश्च। च मद्ध्यतः। मद्ध्यतः स्तोमौ। स्तोमौ भवतः। भवतः संवँथ्सरस्य। संवँथ्सरस्यैव। संवँथ्सरस्येति सम्—वथ्सरस्य। एव तत्। तन् मिथुनम्। मिथुनम् मद्ध्यतः। मद्ध्यतो दधति। ॥ [४] ॥ दधति प्रजननाय। प्रजननाय ज्योतिः। प्रजननायेति प्र—जननाय। ज्योतिरभितः। अभितो भवति। भवति विमोचनम्। विमोचनमेव। विमोचनमिति वि—मोचनम्। एव तत्। तच् छन्दाꣳसि। छन्दाꣳस्येव। एव तत्। तद् विमोकम्। विमोकँय्यन्ति। विमोकमिति वि—मोकम्। यन्त्यथो। अथो उभयतोज्योतिषा। अथो इत्यथो। उभयतोज्योतिषैव। उभयतोज्योतिषेत्युभयतः—ज्योतिषा। एव षडहेन। षडहेन सुवर्गम्। षडहेनेति षट्—अहेन। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकँय्यन्ति। यन्ति ब्रह्मवादिनः। ब्रह्मवादिनो वदन्ति। ब्रह्मवादिन इति ब्रह्म—वादिनः। वदन्त्यासते। आसते केन। केन यन्ति। यन्तीति। इति देवयानेन। देवयानेन पथा। देवयानेनेति देव—यानेन। पथेति। इति ब्रूयात्। ब्रूयाच् छन्दाꣳसि। छन्दाꣳसि वै। वै देवयानः। देवयानः पन्थाः। देवयान इति देव—यानः। पन्था गायत्री। गायत्री त्रिष्टुप्। त्रिष्टुब् जगती। जगती ज्योतिः। ज्योतिर् वै। वै गायत्री। गायत्री गौः। गौस्त्रिष्टुक्। त्रिष्टुगायुः। आयुर् जगती। जगती यत्। यदेते। एते स्तोमाः। स्तोमा भवन्ति। भवन्ति देवयानेन। देवयानेनैव। देवयानेनेति देव—यानेन। एव तत्। ॥ [५] ॥ तत् पथा। पथा यन्ति। यन्ति समानम्। समानꣳ साम। साम भवति। भवति देवलोकः। देवलोको वै। देवलोक इति देव—लोकः। वै साम। साम देवलोकात्। देवलोकादेव। देवलोकादिति देव—लोकात्। एव न। न यन्ति। यन्त्यन्याअन्याः। अन्याअन्या ऋचः। अन्याअन्या इत्यन्याः—अन्याः।

ऋचो भवन्ति। भवन्ति मनुष्यलोकः। मनुष्यलोको वै। मनुष्यलोक इति मनुष्य—लोकः। वा ऋचः। ऋचो मनुष्यलोकात्। मनुष्यलोकादेव। मनुष्यलोकादिति मनुष्य—लोकात्। एवा-न्यमन्यम्। अन्यमन्यम् देवलोकम्। अन्यमन्यमित्यन्यम्—अन्यम्। देवलोकमभ्यारोहन्तः। देवलोकमिति देव—लोकम्। अभ्यारोहन्तो यन्ति। अभ्यारोहन्त इत्यभि—आरोहन्तः। यन्त्य-भिवर्तः। अभिवर्तो ब्रह्मसामम्। अभिवर्त इत्यभि—वर्तः। ब्रह्मसामम् भवति। ब्रह्मसाममिति ब्रह्म—सामम्। भवति सुवर्गस्य। सुवर्गस्य लोकस्य। सुवर्गस्येति सुवः—गस्य। लोकस्याभि-वृत्यै। अभिवृत्या अभिजित्। अभिवृत्या इत्यभि—वृत्यै। अभिजिद् भवति। अभिजिदित्यभि—जित्। भवति सुवर्गस्य। सुवर्गस्य लोकस्य। सुवर्गस्येति सुवः—गस्य। लोकस्याभिजित्यै। अभिजित्यै विश्वजित्। अभिजित्या इत्यभि—जित्यै। विश्वजिद् भवति। विश्वजिदिति विश्व—जित्। भवति विश्वस्य। विश्वस्य जित्यै। जित्यै मासिमासि। मासिमासि पृष्ठानि। मासिमासीति मासि—मासि। पृष्ठान्युप। उप यन्ति। यन्ति मासिमासि। मासिमास्यतिग्राह्याः। मासिमासीति मासि—मासि। अतिग्राह्या गृह्यन्ते। अतिग्राह्या इत्यति—ग्राह्याः। गृह्यन्ते मासिमासि। मासि-मास्येव। मासिमासीति मासि—मासि। एव वीर्यम्। वीर्यम् दधति। दधति मासाम्। मासाम् प्रतिष्ठित्यै। प्रतिष्ठित्या उपरिष्टात्। प्रतिष्ठित्या इति प्रति—स्थित्यै। उपरिष्टान् मासाम्। मासाम् पृष्ठानि। पृष्ठान्युप। उप यन्ति। यन्ति तस्मात्। तस्मादुपरिष्टात्। उपरिष्टादोषधयः। ओषधयः फलम्। फलम् गृह्णन्ति। गृह्णन्तीति गृह्णन्ति॥ ॥ [६] ॥

(गोसत्रम् वा एति सव्ँवथ्सरो ऽर्द्धमासा मिथुनम् मध्यतो देवयानेनैव वीर्यम् त्रयोदश च) ॥ १ ॥

गावो वै। वा एतत्। एतथ् सत्रम्। सत्रमासत। आसताशृङ्गाः। अशृङ्गाः सतीः। सतीः शृङ्गाणि। शृङ्गाणि सिषासन्तीः। सिषासन्तीस्तासाम्। तासाम् दश। दश मासाः। मासा निषण्णाः। निषण्णा आसन्न्। निषण्णा इति नि—सन्नाः। आसन्नथ। अथ शृङ्गाणि। शृङ्गाण्यजायन्त। अजायन्त ताः। ता अब्रुवन्न्। अब्रुवन्नराथ्स्म। अराथ्स्मोत्। उत् तिष्ठाम। तिष्ठामाव। अव तम्। तम् कामम्। काममरुथ्स्महि। अरुथ्स्महि येन। येन कामेन। कामेन न्यषदाम। न्यषदामेति। न्यषदामेति नि—असदाम। इति तासाम्। तासामु। उ तु। त्वै। वा

अब्रुवन्न्। अब्रुवन्नर्द्धाः। अर्द्धा वा। वा यावतीः। यावतीर् वा। वाऽऽसामहै। आसामहा एव। एवेमौ। इमौ द्वादशौ। द्वादशौ मासौ। मासौ सँव्वथ्सरम्। सँव्वथ्सरꣳ सम्पाद्य। सँव्वथ्सरमिति सम्—वथ्सरम्। सम्पाद्योत्। सम्पाद्येति सम्—पाद्य। उत् तिष्ठाम। तिष्ठामेति। इति तासाम्। तासाम् द्वादशे। ॥ [७] ॥ द्वादशे मासि। मासि शृङ्गाणि। शृङ्गाणि प्र। प्रावर्तन्त। अव-र्तन्त श्रद्धया। श्रद्धया वा। श्रद्धयेति श्रत्—धया। वाऽश्रद्धया। अश्रद्धया वा। अश्रद्धये-त्यश्रत्—धया। वा ताः। ता इमाः। इमा याः। यास्तूपराः। तूपरा उभय्यः। उभय्यो वाव। वाव ताः। ता आर्द्ध्नुवन्न्। आर्द्ध्नुवन्याः। याश्च। च शृङ्गाणि। शृङ्गाण्यसन्वन्न्। असन्वन्याः। याश्च। चोर्जम्। ऊर्जमवारुन्धत। अवारुन्धतर्द्ध्नोति। अवारुन्धतेत्यव—अरुन्धत। ऋद्ध्नोति दशसु। दशसु मासु। दशस्विति दश—सु। मासूत्तिष्ठन्न्। उत्तिष्ठन्नृद्ध्नोति। उत्तिष्ठन्नित्युत्—तिष्ठन्न्। ऋद्ध्नोति द्वादशसु। द्वादशसु यः। द्वादशस्विति द्वादश—सु। य एवम्। एवँव्वेद। वेद पदेन। पदेन खलु। खलु वै। वा एते। एते यन्ति। यन्ति विन्दति। विन्दति खलु। खलु वै। वै पदेन। पदेन यन्न्। यन् तत्। तद् वै। वा एतत्। एतदृद्धम्। ऋद्धमयनम्। अयनम् तस्मात्। तस्मादेतत्। एतद् गोसनि। गोसनीति गो—सनि॥ ॥ [८] ॥

(तिष्ठामेति तासाम् तस्माद् द्वे च) ॥ २ ॥

प्रथमे मासि। मासि पृष्ठानि। पृष्ठान्युप। उप यन्ति। यन्ति मद्ध्यमे। मद्ध्यम उप। उप यन्ति। यन्त्युत्तमे। उत्तम उप। उत्तम इत्युत्—तमे। उप यन्ति। यन्ति तत्। तदाहुः। आहुर् याम्। याँव्वै। वै त्रिः। त्रिरेकस्य। एकस्याह्नः। अह्न उपसीदन्ति। उपसीदन्ति दह्नम्। उप-सीदन्तीत्युप—सीदन्ति। दह्नँव्वै। वै सा। साऽपराभ्याम्। अपराभ्याम् दोहाभ्याम्। दोहाभ्याम् दुहे। दुहेऽथ। अथ कुतः। कुतः सा। सा धोक्ष्यते। धोक्ष्यते याम्। याम् द्वादश। द्वादश कृत्वः। कृत्व उपसीदन्ति। उपसीदन्तीति। उपसीदन्तीत्युप—सीदन्ति। इति सँव्वथ्सरम्। सँव्वथ्सरꣳ सम्पाद्य। सँव्वथ्सरमिति सम्—वथ्सरम्। सम्पाद्योत्तमे। सम्पाद्येति सम्—पाद्य। उत्तमे मासि। उत्तम इत्युत्—तमे। मासि सकृत्। सकृत् पृष्ठानि। पृष्ठान्युप। उपेयुः। इयुस्तत्। तद् यजमानाः। यजमाना यज्ञम्। यज्ञम् पशून्। पशूनव। अव रुन्धते। रुन्धते समुद्रम्।

समुद्रव्वै। वा एते। ॥ [९] ॥ एतेऽनवारम्। अनवारमपारम्। अपारम् प्र। प्र प्लवन्ते। प्लवन्ते ये। ये सँव्वथ्सरम्। सँव्वथ्सरमुपयन्ति। सँव्वथ्सरमिति सम्—वथ्सरम्। उपयन्ति यत्। उपयन्तीत्युप—यन्ति। यद् बृहद्रथन्तरे। बृहद्रथन्तरे अन्वजैयुः। बृहद्रथन्तरे इति बृहत्—रथन्तरे। अन्वजैयुर् यथा। अन्वजैयुरित्यनु—अजैयुः। यथा मद्ध्ये। मद्ध्ये समुद्रस्य। समुद्रस्य प्लवम्। प्लवमन्वजैयुः। अन्वजैयुस्तादृक्। अन्वजैयुरित्यनु—अजैयुः। तादृक् तत्। तदनुथ्सर्गम्। अनुथ्सर्गम् बृहद्रथन्तराभ्याम्। अनुथ्सर्गमित्यनु—सर्गम्। बृहद्रथन्तराभ्या-मित्वा। बृहद्रथन्तराभ्यामिति बृहत्—रथन्तराभ्याम्। इत्वा प्रतिष्ठाम्। प्रतिष्ठाम् गच्छन्ति। प्रतिष्ठामिति प्रति—स्थाम्। गच्छन्ति सर्वेभ्यः। सर्वेभ्यो वै। वै कामेभ्यः। कामेभ्यः सन्धिः। सन्धिर् दुहे। सन्धिरिति सम्—धिः। दुहे तत्। तद् यजमानाः। यजमानाः सर्वान्। सर्वान् कामान्। कामानव। अव रुन्धते। रुन्धत इति रुन्धते॥ ॥ [१०] ॥

(समुद्रम् वै चतुस्त्रिꣳशच्च) ॥ ३ ॥

---

समान्य ऋचः। ऋचो भवन्ति। भवन्ति मनुष्यलोकः। मनुष्यलोको वै। मनुष्यलोक इति मनुष्य—लोकः। वा ऋचः। ऋचो मनुष्यलोकात्। मनुष्यलोकादेव। मनुष्यलोकादिति मनुष्य—लोकात्। एव न। न यन्ति। यन्त्यन्यदन्यत्। अन्यदन्यथ् साम। अन्यदन्यदि-त्यन्यत्—अन्यत्। साम भवति। भवति देवलोकः। देवलोको वै। देवलोक इति देव—लोकः। वै साम। साम देवलोकात्। देवलोकादेव। देवलोकादिति देव—लोकात्। एवान्यमन्यम्। अन्यमन्यम् मनुष्यलोकम्। अन्यमन्यमित्यन्यम्—अन्यम्। मनुष्यलोकम् प्रत्यवरोहन्तः। मनुष्यलोकमिति मनुष्य—लोकम्। प्रत्यवरोहन्तो यन्ति। प्रत्यवरोहन्त इति प्रति—अवरो-हन्तः। यन्ति जगतीम्। जगतीमग्रे। अग्र उप। उप यन्ति। यन्ति जगतीम्। जगतीव्वै। वै छन्दाꣳसि। छन्दाꣳसि प्रत्यवरोहन्ति। प्रत्यवरोहन्त्याग्रयणम्। प्रत्यवरोहन्तीति प्रति—अवरोहन्ति। आग्रयणम् ग्रहाः। ग्रहा बृहत्। बृहत् पृष्ठानि। पृष्ठानि त्रयस्त्रिꣳशम्। त्रय-स्त्रिꣳशꣳ स्तोमाः। त्रयस्त्रिꣳशमिति त्रयः—त्रिꣳशम्। स्तोमास्तस्मात्। तस्माज् ज्यायाꣳसम्। ज्यायाꣳसम् कनीयान्। कनीयान् प्रत्यवरोहति। प्रत्यवरोहति वैश्वकर्मणः। प्रत्यवरोहतीति

प्रति—अवरोहति। वैश्वकर्मणो गृह्यते। वैश्वकर्मण इति वैश्व—कर्मणः। गृह्यते विश्वानि। विश्वान्येव। एव तेन। तेन कर्माणि। कर्माणि यजमानाः। यजमाना अव। अव रुन्धते। रुन्धत आदित्यः। आदित्यो गृह्यते। ॥ [११] ॥ गृह्यत इयम्। इयँवै। वा अदितिः। अदितिरस्याम्। अस्यामेव। एव प्रति। प्रति तिष्ठन्ति। तिष्ठन्त्यन्योन्यः। अन्योन्यो गृह्येते। अन्योन्य इत्यन्यः—अन्यः। गृह्येते मिथुनत्वाय। गृह्येते इति गृह्येते। मिथुनत्वाय प्रजात्यै। मिथुनत्वायेति मिथुन—त्वाय। प्रजात्या अवान्तरम्। प्रजात्या इति प्र—जात्यै। अवान्तरँवै। अवान्तरमित्यव—अन्तरम्। वै दशरात्रेण। दशरात्रेण प्रजापतिः। दशरात्रेणेति दश—रात्रेण। प्रजापतिः प्रजाः। प्रजापतिरिति प्रजा—पतिः। प्रजा असृजत। प्रजा इति प्र—जाः। असृजत यत्। यद् दशरात्रः। दशरात्रो भवति। दशरात्र इति दश—रात्रः। भवति प्रजाः। प्रजा एव। प्रजा इति प्र—जाः। एव तत्। तद् यजमानाः। यजमानाः सृजन्ते। सृजन्त एताम्। एताꣳ ह। ह वै। वा उदङ्कः। उदङ्कः शौल्बायनः। शौल्बायनः सत्रस्य। सत्रस्यर्द्धिम्। ऋद्धिमुवाच। उवाच यत्। यद् दशरात्रः। दशरात्रो यत्। दशरात्र इति दश—रात्रः। यद् दशरात्रः। दशरात्रो भवति। दशरात्र इति दश—रात्रः। भवति सत्रस्य। सत्रस्यर्द्ध्यै। ऋद्ध्या अथो। अथो यत्। अथो इत्यथो। यदेव। एव पूर्वेषु। पूर्वेष्वहस्सु। अहस्सु विलोम। अहस्स्वित्यहः—सु। विलोम क्रियते। विलोमेति वि—लोम। क्रियते तस्य। तस्यैव। एवैषा। एषा शान्तिः। शान्तिरिति शान्तिः॥ ॥ [१२] ॥

(आदित्य स्तस्यैव द्वे च) ॥ ४ ॥

---

यदि सोमौ। सोमौ सꣳसुतौ। सꣳसुतौ स्याताम्। सꣳसुताविति सम्—सुतौ। स्याताम् महति। महति रात्रियै। रात्रियै प्रातरनुवाकम्। प्रातरनुवाकमुपाकुर्यात्। प्रातरनुवाकमिति प्रातः—अनुवाकम्। उपाकुर्यात् पूर्वः। उपाकुर्यादित्युप—आकुर्यात्। पूर्वो वाचम्। वाचम् पूर्वः। पूर्वो देवताः। देवताः पूर्वः। पूर्वश्छन्दाꣳसि। छन्दाꣳसि वृङ्क्ते। वृङ्क्ते वृषण्वतीम्। वृषण्वतीम् प्रतिपदम्। वृषण्वतीमिति वृषण्—वतीम्। प्रतिपदम् कुर्यात्। प्रतिपदमिति प्रति—पदम्। कुर्यात् प्रातस्सवनात्। प्रातस्सवनादेव। प्रातस्सवनादिति प्रातः—सवनात्। एवैषाम्।

एषामिन्द्रम्। इन्द्रँव्वृङ्क्ते। वृङ्क्तेऽथो। अथो खलु। अथो इत्यथो। खल्वाहुः। आहुः सवनमुखेसवनमुखे। सवनमुखेसवनमुखे कार्या। सवनमुखेसवनमुख इति सवनमुखे—सवनमुखे। कार्येति। इति सवनमुखाथ्सवनमुखात्। सवनमुखाथ्सवनमुखादेव। सवनमुखाथ्सवनमुखादिति सवनमुखात्—सवनमुखात्। एवैषाम्। एषामिन्द्रम्। इन्द्रँव्वृङ्क्ते। वृङ्क्ते सँव्वेशाय। सँव्वेशायोपवेशाय। सँव्वेशायेति सम्—वेशाय। उपवेशाय गायत्रियाः। उपवेशायेत्युप—वेशाय। गायत्रियास्त्रिष्टुभः। त्रिष्टुभो जगत्याः। जगत्या अनुष्टुभः। अनुष्टुभः पङ्क्त्याः। अनुष्टुभ इत्यनु—स्तुभः। पङ्क्त्या अभिभूत्यै। अभिभूत्यै स्वाहा। अभिभूत्या इत्यभि—भूत्यै। स्वाहा छन्दाꣳसि। छन्दाꣳसि वै। वै सँव्वेशः। सँव्वेश उपवेशः। सँव्वेश इति सम्—वेशः। उपवेशश्छन्दोभिः। उपवेश इत्युप—वेशः। छन्दोभिरेव। छन्दोभिरिति छन्दः—भिः। एवैषाम्। एषाम् छन्दाꣳसि। ॥ [१३] ॥ छन्दाꣳसि वृङ्क्ते। वृङ्क्ते सजनीयम्। सजनीयꣳ शस्यम्। सजनीयमिति स—जनीयम्। शस्यँव्विहव्यम्। विहव्यꣳ शस्यम्। विहव्यमिति वि—हव्यम्। शस्यमगस्त्यस्य। अगस्त्यस्य कयाशुभीयम्। कयाशुभीयꣳ शस्यम्। कयाशुभीयमिति कया—शुभीयम्। शस्यमेतावत्। एतावद् वै। वा अस्ति। अस्ति यावत्। यावदेतत्। एतद् यावत्। यावदेव। एवास्ति। अस्ति तत्। तदेषाम्। एषाँव्वृङ्क्ते। वृङ्क्ते यदि। यदि प्रातस्सवने। प्रातस्सवने कलशः। प्रातस्सवन इति प्रातः—सवने। कलशो दीयेत। दीयेत वैष्णवीषु। वैष्णवीषु शिपिविष्टवतीषु। शिपिविष्टवतीषु स्तुवीरन्न्। शिपिविष्टवतीष्विति शिपिविष्ट—वतीषु। स्तुवीरन्यत्। यद् वै। वै यज्ञस्य। यज्ञस्यातिरिच्यते। अतिरिच्यते विष्णुम्। अतिरिच्यत इत्यति—रिच्यते। विष्णुम् तत्। तच्छिपिविष्टम्। शिपिविष्टमभि। शिपिविष्टमिति शिपि—विष्टम्। अभ्यति। अति रिच्यते। रिच्यते तत्। तद् विष्णुः। विष्णुः शिपिविष्टः। शिपिविष्टोऽतिरिक्ते। शिपिविष्ट इति शिपि—विष्टः। अतिरिक्त एव। अतिरिक्त इत्यति—रिक्ते। एवातिरिक्तम्। अतिरिक्तम् दधाति। अतिरिक्तमित्यति—रिक्तम्। दधात्यथो। अथो अतिरिक्तेन। अथो इत्यथो। अतिरिक्तेनैव। अतिरिक्तेनेत्यति—रिक्तेन। एवातिरिक्तम्। अतिरिक्तमाप्त्वा। अतिरिक्तमित्यति—रिक्तम्। आप्त्वाऽव। अव रुन्धते। रुन्धते यदि। यदि मद्ध्यन्दिने। मद्ध्यन्दिने दीयेत। दीयेत वषट्कारनिधनम्। वषट्कारनिधनꣳ साम। वषट्कारनिधनमिति वष-

द्कार—निधनम्। साम कुर्युः। कुर्युर् वषट्कारः। वषट्कारो वै। वषट्कार इति वषट्—कारः। वै यज्ञस्य। यज्ञस्य प्रतिष्ठा। प्रतिष्ठा प्रतिष्ठाम्। प्रतिष्ठेति प्रति—स्था। प्रतिष्ठामेव। प्रतिष्ठामिति प्रति—स्थाम्। एवैनत्। एनद् गमयन्ति। गमयन्ति यदि। यदि तृतीयसवने। तृतीयसवन एतत्। तृतीयसवन इति तृतीय—सवने। एतदेव। एवेत्येव॥ ॥ [१४] ॥

(छन्दोभिरेवैषा मवै कान्नविंशतिश्च) ॥ ५ ॥

षडहैर् मासान्। षडहैरिति षट्—अहैः। मासान्थ् सम्पाद्य। सम्पाद्याहः। सम्पाद्येति सम्—पाद्य। अहरुत्। उथ् सृजन्ति। सृजन्ति षडहैः। षडहैर्हि। षडहैरिति षट्—अहैः। हि मासान्। मासान्थ् सम्पश्यन्ति। सम्पश्यन्त्यर्द्धमासैः। सम्पश्यन्तीति सम्—पश्यन्ति। अर्द्धमासैर् मासान्। अर्द्धमासैरित्यर्द्ध—मासैः। मासान्थ् सम्पाद्य। सम्पाद्याहः। सम्पाद्येति सम्—पाद्य। अहरुत्। उथ् सृजन्ति। सृजन्त्यर्द्धमासैः। अर्द्धमासैर्हि। अर्द्धमासैरित्यर्द्ध—मासैः। हि मासान्। मासान्थ् सम्पश्यन्ति। सम्पश्यन्त्यमावास्यया। सम्पश्यन्तीति सम्—पश्यन्ति। अमावास्यया मासान्। अमावास्ययेत्यमा—वास्यया। मासान्थ् सम्पाद्य। सम्पाद्याहः। सम्पाद्येति सम्—पाद्य। अहरुत्। उथ् सृजन्ति। सृजन्त्यमावास्यया। अमावास्यया हि। अमावास्ययेत्यमा—वास्यया। हि मासान्। मासान्थ् सम्पश्यन्ति। सम्पश्यन्ति पौर्णमास्या। सम्पश्यन्तीति सम्—पश्यन्ति। पौर्णमास्या मासान्। पौर्णमास्येति पौर्ण—मास्या। मासान्थ् सम्पाद्य। सम्पाद्याहः। सम्पाद्येति सम्—पाद्य। अहरुत्। उथ् सृजन्ति। सृजन्ति पौर्णमास्या। पौर्णमास्या हि। पौर्णमास्येति पौर्ण—मास्या। हि मासान्। मासान्थ् सम्पश्यन्ति। सम्पश्यन्ति यः। सम्पश्यन्तीति सम्—पश्यन्ति। यो वै। वै पूर्णे। पूर्ण आसिञ्चति। आसिञ्चति परा। आसिञ्चतीत्या—सिञ्चति। परा सः। स सिञ्चति। सिञ्चति यः। यः पूर्णात्। पूर्णादुदचति। उदचति प्राणम्। उदचतीत्युत्—अचति। ॥ [१५] ॥ प्राणमस्मिन्न्। प्राणमिति प्र—अनम्। अस्मिन्थ् सः। स दधाति। दधाति यत्। यत् पौर्णमास्या। पौर्णमास्या मासान्। पौर्णमास्येति पौर्ण—मास्या। मासान्थ् सम्पाद्य। सम्पाद्याहः। सम्पाद्येति सम्—पाद्य। अहरुथ्सृजन्ति। उथ्सृजन्ति सँव्वथ्सराय। उथ्सृजन्तीत्युत्—सृजन्ति। सँव्वथ्सरायैव। सँव्वथ्सरायेति

सम्—वथ्सराय। एव तत्। तत् प्राणम्। प्राणम् दधति। प्राणमिति प्र—अनम्। दधति तत्। तदनु। अनु सत्रिणः। सत्रिणः प्र। प्राणन्ति। अनन्ति यत्। यदहः। अहर् न। नोथ्सृजेयुः। उथ्सृजेयुर् यथा। उथ्सृजेयुरित्युत्—सृजेयुः। यथा दृतिः। दृतिरुपनद्धः। उपनद्धो विपतति। उपनद्ध इत्युप—नद्धः। विपतत्येवम्। विपततीति वि—पतति। एवꣳ सँव्वथ्सरः। सँव्वथ्सरो वि। सँव्वथ्सर इति सम्—वथ्सरः। वि पतेत्। पतेदार्तिम्। आर्तिमा। आर्छेयुः। ऋच्छेयुर् यत्। यत् पौर्णमास्या। पौर्णमास्या मासान्। पौर्णमास्येति पौर्ण—मास्या। मासान्थ् सम्पाद्य। सम्पाद्याहः। सम्पाद्येति सम्—पाद्य। अहरुथ्सृजन्ति। उथ्सृजन्ति सँव्वथ्सराय। उथ्सृज-न्तीत्युत्—सृजन्ति। सँव्वथ्सरायैव। सँव्वथ्सरायेति सम्—वथ्सराय। एव तत्। तदुदानम्। उदानम् दधति। उदानमित्युत्—अनम्। दधति तत्। तदनु। अनु सत्रिणः। सत्रिण उत्। उदनन्ति। ॥ [१६] ॥ अनन्ति न। नार्तिम्। आर्तिमा। आर्छन्ति। ऋच्छन्ति पूर्णमासे। पूर्णमासे वै। पूर्णमास इति पूर्ण—मासे। वै देवानाम्। देवानाꣳ सुतः। सुतो यत्। यत् पौर्ण-मास्या। पौर्णमास्या मासान्। पौर्णमास्येति पौर्ण—मास्या। मासान्थ् सम्पाद्य। सम्पाद्याहः। सम्पाद्येति सम्—पाद्य। अहरुथ्सृजन्ति। उथ्सृजन्ति देवानाम्। उथ्सृजन्तीत्युत्—सृजन्ति। देवानामेव। एव तत्। तद् यज्ञेन। यज्ञेन यज्ञम्। यज्ञम् प्रत्यवरोहन्ति। प्रत्यवरोहन्ति वि। प्रत्य-वरोहन्तीति प्रति—अवरोहन्ति। वि वै। वा एतत्। एतद् यज्ञम्। यज्ञम् छिन्दन्ति। छिन्दन्ति यत्। यथ् षडहसन्ततम्। षडहसन्ततꣳ सन्तम्। षडहसन्ततमिति षडह—सन्ततम्। सन्त-मथ। अथाहः। अहरुथ्सृजन्ति। उथ्सृजन्ति प्राजापत्यम्। उथ्सृजन्तीत्युत्—सृजन्ति। प्राजा-पत्यम् पशुम्। प्राजापत्यमिति प्राजा—पत्यम्। पशुमा। आ लभन्ते। लभन्ते प्रजापतिः। प्रजा-पतिः सर्वाः। प्रजापतिरिति प्रजा—पतिः। सर्वा देवताः। देवता देवताभिः। देवताभिरेव। एव यज्ञम्। यज्ञꣳ सम्। सम् तन्वन्ति। तन्वन्ति यन्ति। यन्ति वै। वा एते। एते सवनात्। सवनाद् ये। येऽहः। अहरुथ्सृजन्ति। ॥ [१७] ॥ उथ्सृजन्ति तुरीयम्। उथ्सृजन्तीत्युत्—सृजन्ति। तुरीयम् खलु। खलु वै। वा एतत्। एतथ् सवनम्। सवनँय्यत्। यथ् सान्नाय्यम्। सान्नाय्यँय्यत्। सान्नाय्यमिति साम्—नाय्यम्। यथ् सान्नायम्। सान्नाय्यम् भवति। सान्नाय्यमिति साम्—नाय्यम्। भवति तेन। तेनैव। एव सवनात्। सवनान् न। न यन्ति। यन्ति समुपहूय। समुपहूय

भख्षयन्ति। समुपहूयेति सम्—उपहूय। भख्षयन्त्येतथ्सोमपीथाः। एतथ्सोमपीथा हि। एतथ्सोमपीथा इत्येतत्—सोमपीथाः। ह्येतर्हि। एतर्हि यथायतनम्। यथायतनव्वै। यथायतनमिति यथा—आयतनम्। वा एतेषाम्। एतेषाꣳ सवनभाजः। सवनभाजो देवताः। सवनभाज इति सवन—भाजः। देवता गच्छन्ति। गच्छन्ति ये। येऽहः। अहरुथ्सृजन्ति। उथ्सृजन्त्यनुसवनम्। उथ्सृजन्तीत्युत्—सृजन्ति। अनुसवनम् पुरोडाशान्। अनुसवनमित्यनु—सवनम्। पुरोडाशान् निः। निर् वपन्ति। वपन्ति यथायतनात्। यथायतनादेव। यथायतनादिति यथा—आयतनात्। एव सवनभाजः। सवनभाजो देवताः। सवनभाज इति सवन—भाजः। देवता अव। अव रुन्धते। रुन्धतेऽष्टाकपालान्। अष्टाकपालान् प्रातस्सवने। अष्टाकपालानित्यष्टा—कपालान्। प्रातस्सवन एकादशकपालान्। प्रातस्सवन इति प्रातः—सवने। एकादशकपालान् माद्ध्यन्दिने। एकादशकपालानित्येकादश—कपालान्। माद्ध्यन्दिने सवने। सवने द्वादशकपालान्। द्वादशकपालाꣳ स्तृतीयसवने। द्वादशकपालानिति द्वादश—कपालान्। तृतीयसवने छन्दाꣳसि। तृतीयसवन इति तृतीय—सवने। छन्दाꣳस्येव। एवाप्त्वा। आप्त्वाऽव। अव रुन्धते। रुन्धते वैश्वदेवम्। वैश्वदेवम् चरुम्। वैश्वदेवमिति वैश्व—देवम्। चरुम् तृतीयसवने। तृतीयसवने निः। तृतीयसवन इति तृतीय—सवने। निर् वपन्ति। वपन्ति वैश्वदेवम्। वैश्वदेवव्वै। वैश्वदेवमिति वैश्व—देवम्। वै तृतीयसवनम्। तृतीयसवनम् तेन। तृतीयसवनमिति तृतीय—सवनम्। तेनैव। एव तृतीयसवनात्। तृतीयसवनान् न। तृतीयसवनादिति तृतीय—सवनात्। न यन्ति। यन्तीति यन्ति॥ ॥ [१८] ॥

(उदच त्यु ह्येऽहं राप्त्वा पञ्चदश च) ॥ ६ ॥

उथ्सृज्या(३)म् न। उथ्सृज्या(३)मित्युत्—सृज्या(३)म्। नोथ्सृज्या(३)म्। उथ्सृज्या(३)मिति। उथ्सृज्या(३)मित्युत्—सृज्या(३)म्। इति मीमाꣳसन्ते। मीमाꣳसन्ते ब्रह्मवादिनः। ब्रह्मवादिनस्तत्। ब्रह्मवादिन इति ब्रह्म—वादिनः। तदु। वाहुः। आहुरुथ्सृज्यम्। उथ्सृज्यमेव। उथ्सृज्यमित्युत्—सृज्यम्। एवेति। इत्यमावास्यायाम्। अमावास्यायाम् च। अमावास्यायामित्यमा—वास्यायाम्। च पौर्णमास्याम्। पौर्णमास्याम् च। पौर्णमास्यामिति पौर्ण—मास्याम्।

चोथ्सृज्यम्। उथ्सृज्यमिति। उथ्सृज्यमित्युत्—सृज्यम्। इत्याहुः। आहुरेते। एते हि। एते इत्येते। हि यज्ञम्। यज्ञव्ँवहतः। वहत इति। इति ते। ते तु। ते इति ते। त्वाव। वाव न। नोथ्सृज्ये। उथ्सृज्ये इति। उथ्सृज्ये इत्युत्—सृज्ये। इत्याहुः। आहुर् ये। ये अवान्तरम्। ये इति ये। अवान्तरय्ँयज्ञम्। अवान्तरमित्यव—अन्तरम्। यज्ञम् भेजाते। भेजाते इति। भेजाते इति भेजाते। इति या। या प्रथमा। प्रथमा व्यष्टका। व्यष्टका तस्याम्। व्यष्टकेति वि—अष्टका। तस्यामुथ्सृज्यम्। उथ्सृज्यमिति। उथ्सृज्यमित्युत्—सृज्यम्। इत्याहुः। आहुरेषः। एष वै। वै मासः। मासो विशरः। विशर इति। विशर इति वि—शरः। इति न। नादिष्टम्। आदिष्टमुत्। आदिष्टमित्या—दिष्टम्। ॥ [१९] ॥ उथ् सृजेयुः। सृजेयुर् यत्। यदादिष्टम्। आदिष्टमुथ्सृजेयुः। आदिष्टमित्या—दिष्टम्। उथ्सृजेयुर् यादृशे। उथ्सृजेयुरित्युत्—सृजेयुः। यादृशे पुनः। पुनः पर्याप्लावे। पर्याप्लावे मद्ध्ये। पर्याप्लाव इति परि—आप्लावे। मद्ध्ये षडहस्य। षडहस्य सम्पद्येत। षडहस्येति षट्—अहस्य। सम्पद्येत षडहैः। सम्पद्येतेति सम्—पद्येत। षडहैर् मासान्। षडहैरिति षट्—अहैः। मासान्थ् सम्पाद्य। सम्पाद्य यत्। सम्पाद्येति सम्—पाद्य। यथ् सप्तमम्। सप्तममहः। अहस्तस्मिन्न्। तस्मिन्नुत्। उथ् सृजेयुः। सृजेयुस्तत्। तदग्नये। अग्नये वसुमते। वसुमते पुरोडाशम्। वसुमत इति वसु—मते। पुरोडाशमष्टाकपालम्। अष्टाकपालम् निः। अष्टाकपालमित्यष्टा—कपालम्। निर् वपेयुः। वपेयुरैन्द्रम्। ऐन्द्रम् दधि। दधीन्द्राय। इन्द्राय मरुत्वते। मरुत्वते पुरोडाशम्। पुरोडाशमेकादशकपालम्। एकादशकपालव्ँवैश्वदेवम्। एकादशकपालमित्येकादश—कपालम्। वैश्वदेवम् द्वादशकपालम्। वैश्वदेवमिति वैश्व—देवम्। द्वादशकपालमग्नेः। द्वादशकपालमिति द्वादश—कपालम्। अग्नेर् वै। वै वसुमतः। वसुमतः प्रातस्सवनम्। वसुमत इति वसु—मतः। प्रातस्सवनय्ँयत्। प्रातस्सवनमिति प्रातः—सवनम्। यदग्नये। अग्नये वसुमते। वसुमते पुरोडाशम्। वसुमत इति वसु—मते। पुरोडाशमष्टाकपालम्। अष्टाकपालम् निर्वपन्ति। अष्टाकपालमित्यष्टा—कपालम्। निर्वपन्ति देवताम्। निर्वपन्तीति निः—वपन्ति। देवतामेव। एव तत्। तद् भागिनीम्। भागिनीम् कुर्वन्ति। कुर्वन्ति सवनम्। ॥ [२०] ॥ सवनमष्टाभिः। अष्टाभिरुप। उप यन्ति। यन्ति यत्। यदैन्द्रम्। ऐन्द्रम् दधि। दधि भवति। भवतीन्द्रम्। इन्द्रमेव। एव तत्। तद् भागधेयात्। भागधेयान् न। भागधे-

यादिति भाग—धेयात्। न च्यावयन्ति। च्यावयन्तीन्द्रस्य। इन्द्रस्य वै। वै मरुत्वतः। मरुत्वतो माध्यन्दिनम्। माध्यन्दिनꣳ सवनम्। सवनँय्यत्। यदिन्द्राय। इन्द्राय मरुत्वते। मरुत्वते पुरोडाशम्। पुरोडाशमेकादशकपालम्। एकादशकपालम् निर्वपन्ति। एकादशकपालमित्ये-कादश—कपालम्। निर्वपन्ति देवताम्। निर्वपन्तीति निः—वपन्ति। देवतामेव। एव तत्। तद् भागिनीम्। भागिनीम् कुर्वन्ति। कुर्वन्ति सवनम्। सवनमेकादशभिः। एकादशभिरुप। एकादशभिरित्येकादश—भिः। उप यन्ति। यन्ति विश्वेषाम्। विश्वेषाँवै। वै देवानाम्। देवाना-मृभुमताम्। ऋभुमताम् तृतीयसवनम्। ऋभुमतामित्यृभु—मताम्। तृतीयसवनँय्यत्। तृतीय-सवनमिति तृतीय—सवनम्। यद् वैश्वदेवम्। वैश्वदेवम् द्वादशकपालम्। वैश्वदेवमिति वैश्व—देवम्। द्वादशकपालम् निर्वपन्ति। द्वादशकपालमिति द्वादश—कपालम्। निर्वपन्ति देवताः। निर्वपन्तीति निः—वपन्ति। देवता एव। एव तत्। तद् भागिनीः। भागिनीः कुर्वन्ति। कुर्वन्ति सवनम्। सवनम् द्वादशभिः। द्वादशभिरुप। द्वादशभिरिति द्वादश—भिः। ॥ [२१] ॥ उप यन्ति। यन्ति प्राजापत्यम्। प्राजापत्यम् पशुम्। प्राजापत्यमिति प्राजा—पत्यम्। पशुमा। आ लभन्ते। लभन्ते यज्ञः। यज्ञो वै। वै प्रजापतिः। प्रजापतिर् यज्ञस्य। प्रजापतिरिति प्रजा—पतिः। यज्ञस्यानानुसर्गाय। अननुसर्गायाभिवर्तः। अननुसर्गायेत्यननु—सर्गाय। अभिवर्त इतः। अभिवर्त इत्यभि—वर्तः। इतः षट्। षण्मासः। मासो ब्रह्मसामम्। ब्रह्मसामम् भवति। ब्रह्मसाममिति ब्रह्म—सामम्। भवति ब्रह्म। ब्रह्म वै। वा अभिवर्तः। अभिवर्तो ब्रह्मणा। अभिवर्त इत्यभि—वर्तः। ब्रह्मणैव। एव तत्। तथ् सुवर्गम्। सुवर्गँल्लोकम्। सुवर्गमिति सुवः—गम्। लोकमभिवर्तयन्तः। अभिवर्तयन्तो यन्ति। अभिवर्तयन्त इत्यभि—वर्तयन्तः। यन्ति प्रतिकूलम्। प्रतिकूलमिव। प्रतिकूलमिति प्रति—कूलम्। इव हि। हीतः। इतः सुवर्गः। सुवर्गो लोकः। सुवर्ग इति सुवः—गः। लोक इन्द्र। इन्द्र क्रतुम्। क्रतुम् नः। न आ। आ भर। भर पिता। पिता पुत्रेभ्यः। पुत्रेभ्यो यथा। यथेति यथा॥ शिक्षा नः। नो अस्मिन्न्। अस्मिन् पुरुहूत। पुरुहूत यामनि। पुरुहूतेति पुरु—हूत। यामनि जीवाः। जीवा ज्योतिः। ज्योतिरशीमहि। अशीमहीति। इत्यमुतः। अमुत आयताम्। आयताꣳ षट्। आयतामित्या—यताम्। षण्मासः। मासो ब्रह्मसामम्। ब्रह्मसामम् भवति। ब्रह्मसाममिति ब्रह्म—सामम्।

भवत्ययम्। अयव्वैँ। वै लोकः। लोको ज्योतिः। ज्योतिः प्रजा। प्रजा ज्योतिः। प्रजेति प्र—जा। ज्योतिरिमम्। इममेव। एव तत्। तल्लोकम्। लोकम् पश्यन्तः। पश्यन्तोऽभिवदन्तः। अभिवदन्त आ। अभिवदन्त इत्यभि—वदन्तः। आ यन्ति। यन्तीति यन्ति॥ ॥ [२२] ॥

(नादिष्टम् कुर्वन्ति द्वादशभि रिति विꣳशतिश्च) ॥ ७ ॥

---

देवानाव्वैँ। वा अन्तम्। अन्तम् जग्मुषाम्। जग्मुषामिन्द्रियम्। इन्द्रियव्वीँर्यम्। वीर्यमप। अपाक्रामत्। अक्रामत् तत्। तत् क्रोशेन। क्रोशेनाव। अवारुन्धत। अरुन्धत तत्। तत् क्रोशस्य। क्रोशस्य क्रोशत्वम्। क्रोशत्वय्यँत्। क्रोशत्वमिति क्रोश—त्वम्। यत् क्रोशेन। क्रोशेन चात्वालस्य। चात्वालस्यान्ते। अन्ते स्तुवन्ति। स्तुवन्ति यज्ञस्य। यज्ञस्यैव। एवान्तम्। अन्तम् गत्वा। गत्वेन्द्रियम्। इन्द्रियव्वीँर्यम्। वीर्यमव। अव रुन्धते। रुन्धते सत्रस्यर्द्ध्या। सत्रस्यर्द्ध्याऽऽहवनीयस्य। आहवनीयस्यान्ते। आहवनीयस्येत्या—हवनीयस्य। अन्ते स्तुवन्ति। स्तुवन्त्यग्निम्। अग्निमेव। एवोपद्रष्टारम्। उपद्रष्टारम् कृत्वा। उपद्रष्टारमि-त्युप—द्रष्टारम्। कृत्वर्द्धिम्। ऋद्धिमुप। उप यन्ति। यन्ति प्रजापतेर्हृदयेन। प्रजापतेर्हृदयेन हविर्द्धाने। हविर्द्धानेऽन्तः। हविर्द्धान इति हविः—धाने। अन्तः स्तुवन्ति। स्तुवन्ति प्रेमाणम्। प्रेमाणमेव। एवास्य। अस्य गच्छन्ति। गच्छन्ति श्लोकेन। श्लोकेन पुरस्तात्। पुरस्ताथ् सदसः। सदसः स्तुवन्ति। ॥ [२३] ॥ स्तुवन्त्यनुश्लोकेन। अनुश्लोकेन पश्चात्। अनुश्लोकेनेत्यनु—श्लोकेन। पश्चाद् यज्ञस्य। यज्ञस्यैव। एवान्तम्। अन्तम् गत्वा। गत्वा श्लोकभाजः। श्लोकभाजो भवन्ति। श्लोकभाज इति श्लोक—भाजः। भवन्ति नवभिः। नवभिरद्ध्वर्युः। नवभिरिति नव—भिः। अद्ध्वर्युरुत्। उद् गायति। गायति नव। नव वै। वै पुरुषे। पुरुषे प्राणाः। प्राणाः प्राणान्। प्राणा इति प्र—अनाः। प्राणानेव। प्राणानिति प्र—अनान्। एव यजमानेषु। यज-मानेषु दधाति। दधाति सर्वाः। सर्वा ऐन्द्रियः। ऐन्द्रियो भवन्ति। भवन्ति प्राणेषु। प्राणेष्वेव। प्राणेष्विति प्र—अनेषु। एवेन्द्रियम्। इन्द्रियम् दधति। दधत्यप्रतिहताभिः। अप्रतिहताभिरुत्। अप्रतिहताभिरित्यप्रति—हताभिः। उद् गायति। गायति तस्मात्। तस्मात् पुरुषः। पुरुषः सर्वाणि। सर्वाण्यन्यानि। अन्यानि शीर्ष्णः। शीर्ष्णोऽङ्गानि। अङ्गानि प्रति। प्रत्यञ्चति।

अच्चति शिरः। शिर एव। एव न। न पञ्चदशम्। पञ्चदशꣳ रथन्तरम्। पञ्चदशमिति पञ्च—दशम्। रथन्तरम् भवति। रथन्तरमिति रथम्—तरम्। भवतीन्द्रियम्। इन्द्रियमेव। एवाव। अव रुन्धते। रुन्धते सप्तदशम्। सप्तदशम् बृहत्। सप्तदशमिति सप्त—दशम्। ॥ [२४] ॥

बृहदन्नाद्यस्य। अन्नाद्यस्यावरुद्ध्यै। अन्नाद्यस्येत्यन्न—अद्यस्य। अवरुद्ध्या अथो। अवरुद्ध्या इत्यव—रुद्ध्यै। अथो प्र। अथो इत्यथो। प्रैव। एव तेन। तेन जायन्ते। जायन्त एकविꣳशम्। एकविꣳशम् भद्रम्। एकविꣳशमित्येक—विꣳशम्। भद्रम् द्विपदासु। द्विपदासु प्रतिष्ठित्यै। द्विपदास्विति द्वि—पदासु। प्रतिष्ठित्यै पत्नयः। प्रतिष्ठित्या इति प्रति—स्थित्यै। पत्नय उप। उप गायन्ति। गायन्ति मिथुनत्वाय। मिथुनत्वाय प्रजात्यै। मिथुनत्वायेति मिथुन—त्वाय। प्रजात्यै प्रजापतिः। प्रजात्या इति प्र—जात्यै। प्रजापतिः प्रजाः। प्रजापतिरिति प्रजाः—पतिः। प्रजा असृजत। प्रजा इति प्र—जाः। असृजत सः। सोऽकामयत। अकामयतासाम्। आसामहम्। अहꣳ राज्यम्। राज्यम् परि। परीयाम्। इयामिति। इति तासाम्। तासाꣳ राजनेन। राजनेनैव। एव राज्यम्। राज्यम् परि। पर्यैत्। ऐत् तत्। तद् राजनस्य। राजनस्य राजनत्वम्। राजनत्वय्ँयत्। राजनत्वमिति राजन—त्वम्। यद् राजनम्। राजनम् भवति। भवति प्रजानाम्। प्रजानामेव। प्रजानामिति प्र—जानाम्। एव तत्। तद् यजमानाः। यजमाना राज्यम्। राज्यम् परि। परि यन्ति। यन्ति पञ्चविꣳशम्। पञ्चविꣳशम् भवति। पञ्चविꣳशमिति पञ्च—विꣳशम्। भवति प्रजापतेः। प्रजापतेराप्त्यै। प्रजापतेरिति प्रजा—पतेः। ॥ [२५] ॥

आप्त्यै पञ्चभिः। पञ्चभिस्तिष्ठन्तः। पञ्चभिरिति पञ्च—भिः। तिष्ठन्तः स्तुवन्ति। स्तुवन्ति देवलोकम्। देवलोकमेव। देवलोकमिति देव—लोकम्। एवाभि। अभि जयन्ति। जयन्ति पञ्चभिः। पञ्चभिरासीनाः। पञ्चभिरिति पञ्च—भिः। आसीना मनुष्यलोकम्। मनुष्यलोकमेव। मनुष्यलोकमिति मनुष्य—लोकम्। एवाभि। अभि जयन्ति। जयन्ति दश। दश सम्। सम् पद्यन्ते। पद्यन्ते दशाख्षरा। दशाख्षरा विराट्। दशाख्षरेति दश—अख्षरा। विराडन्नम्। विराडिति वि—राट्। अन्नँव्विराट्। विराड् विराजा। विराडिति वि—राट्। विराजैव। विराजेति वि—राजा। एवान्नाद्यम्। अन्नाद्यमव। अन्नाद्यमित्यन्न—अद्यम्। अव रुन्धते। रुन्धते पञ्चधा। पञ्चधा विनिषद्य। पञ्चधेति पञ्च—धा। विनिषद्य स्तुवन्ति। विनिषद्येति वि—निषद्य।

स्तुवन्ति पञ्च। पञ्च दिशः। दिशो दिख्षु। दिख्ष्वेव। एव प्रति। प्रति तिष्ठन्ति। तिष्ठन्त्ये-कैकया। एकैकयाऽस्तुतया। एकैकयेत्येकया—एकया। अस्तुतया समायन्ति। समायन्ति दिग्भ्यः। समायन्तीति सम्—आयन्ति। दिग्भ्य एव। दिग्भ्य इति दिक्—भ्यः। एवान्नाद्यम्। अन्नाद्यꣳ सम्। अन्नाद्यमित्यन्न—अद्यम्। सम् भरन्ति। भरन्ति ताभिः। ताभिरुद्गाता। उद्गातोत्। उद्गातेत्युत्—गाता। उद् गायति। गायति दिग्भ्यः। दिग्भ्य एव। दिग्भ्य इति दिक्—भ्यः। एवान्नाद्यम्। अन्नाद्यꣳ सम्भृत्य। अन्नाद्यमित्यन्न—अद्यम्। ॥ [२६] ॥

